# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ७०

तदद्भुततमं वाक्यं श्रुत्वागस्त्यस्य राघवः ।
गौरवाद्विस्मयाच्चैव भूयः प्रष्टुं प्रचक्रमे ॥१॥

भगवंस्तद्वनं घोरं तपस्तप्यति यत्र सः ।
श्वेतो वैदर्भको राजा कथं तदमृगद्विजम् ॥२॥

निःसत्त्वं च वनं जातं शून्यं मनुजवर्जितम् ।
तपश्चर्तुं प्रविष्टः स श्रोतुमिच्छामि तत्त्वतः ॥३॥

रामस्य भाषितं श्रुत्वा कौतूहलसमन्वितम् ।
वाक्यं परमतेजस्वी वक्तुमेवोपचक्रमे ॥४॥

पुरा कृतयुगे राम मनुर्दण्डधरः प्रभुः ।
तस्य पुत्रो महानासीदिक्ष्वाकुः कुलवर्धनः ॥५॥

तं पुत्रं पूर्वके राज्ये निक्षिप्य भुवि दुर्जयम् ।
पृथिव्यां राजवंशानां भव कर्तेत्युवाच ह ॥६॥

तथेति च प्रतिज्ञातं पितुः पुत्रेण राघव ।
ततः परमसंहृष्टो मनुः पुनरुवाच ह ॥७॥

प्रीतोऽस्मि परमोदारकर्ता चासि न संशयः ।
दण्डेन च प्रजा रक्ष मा च दण्डमकारणे ॥८॥

अपराधिषु यो दण्डः पात्यते मानवेषु वै ।
स दण्डो विधिवन्मुक्तः स्वर्गं नयति पार्थिवम् ॥९॥

तस्माद्दण्डे महाबाहो यत्नवान्भव पुत्रक ।
धर्मो हि परमो लोके कुर्वतस्ते भविष्यति ॥१०॥

इति तं बहु सन्दिश्य मनुः पुत्रं समाधिना ।
जगाम त्रिदिवं हृष्टो ब्रह्मलोकमनुत्तमम् ॥११॥

प्रयाते त्रिदिवे तस्मिन्निक्ष्वाकुरमितप्रभः ।
जनयिष्ये कथं पुत्रानिति चिन्तापरोऽभवत् ॥१२॥

कर्मभिर्बहुरूपैश्च तैस्तैर्मनुसुतः सुतान् ।
जनयामास धर्मात्मा शतं देवसुतोपमान् ॥१३॥

तेषामवरजस्तात सर्वेषां रघुनन्दन ।
मूढश्चाकृतिविद्यश्च न शुश्रूषति पूर्वजान् ॥१४॥

नाम तस्य च दण्डेति पिता चक्रेऽल्पतेजसः ।
अवश्यं दण्डपतनं शरीरेऽस्य भविष्यति ॥१५॥

स पश्यमानस्तं दोषं घोरं पुत्रस्य राघव ।
विन्ध्यहृह्य शैवलयोर्मध्ये राज्यं प्रादादरिन्दम ॥१६॥

स दण्डस्तत्र राजाभूद्रम्ये पर्वतरोधसि ।
पुरं चाप्रतिमं राम न्यवेशयदनुत्तमम् ॥१७॥

पुरस्य चाकरोन्नाम मधुमन्तमिति प्रभो ।
पुरोहितं चोशनसं वरयामास सुव्रतम् ॥१८॥

एवं स राजा तद्राज्यं कारयत्सपुरोहितः ।
प्रहृष्टमनुजाकीर्णं देवराज्यं यथा दिवि ॥१९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com